## अन्तिकबाढयोर्नेदसाधौ । (६३/२०१४)

अन्तिकबाढयोः [1]यथासङ्ख्यं नेद साध इत्येतावादेशौ भवतोऽजाद्योः[2] परतः । तयोश्च सत्त्वं पूर्ववद् विज्ञेयम् । निमित्तभूतयोर्यथासङ्ख्यमत्र नेष्यते । सर्वाणीमान्यन्तिकानि, इदमेषामतिशयेन अन्तिकम् नेदिष्ठम् । उभे इमे अन्तिके, इदमनयोरतिशयेन अन्तिकं नेदीयः । इदमस्मान् नेदीयः । सर्वे इमे बाढमधीयते, अयमेषामतिशयेन बाढमधीते साधिष्ठः । उभाविमौ बाढमधीयाते, अयमनयोरतिशयेन बाढमधीते साधीयः । अयमस्मात् [3]साधीयोऽधीते[4] ॥

## युवाल्पयोः कनन्यतरस्याम् । (६४/२०१९)

युवाल्प[5]शब्दयोः कन् इत्ययमादेशो भवत्यन्यतरस्यामजाद्योः[6] परतः । तयोश्च सत्त्वं पूर्ववज्[7]ज्ञेयम् । सर्वे इमे युवानः, अयमेषाम[8]तिशयेन युवा कनिष्ठः । [9]द्वाविमौ युवानौ, अयमनयोर[10]तिशयेन युवा कनीयान् । [11]अयमस्मात् कनीयान् । यविष्ठः, यवीयान् [12]इति वा । सर्वे इमेऽल्पाः, अयमेषाम[13]तिशयेन अल्पः कनिष्ठः । उभाविमावल्पौ, अयमनयोर[14]तिशयेन अल्पः कनीयान् । अयमस्मात् कनीयान् । अल्पिष्ठः, अल्पीयान् इति वा ॥

## विन्मतोर्लुक् । (६५/२०२०)

विनो [15]मतुपश्च लुग् भवति अजाद्योः प्रत्यययोः परतः । इदमेव[16] वचनं ज्ञापकमजादि[17]सद्भावस्य । सर्वे इमे [18]स्रग्विणः, अयमेषा[19]मतिशयेन स्रग्वी स्रजिष्ठः । उभाविमौ स्रग्विणौ, अयमनयोर[20]तिशयेन स्रग्वी स्रजीयान् । अयमस्मात् स्रजीयान् । सर्वे इमे त्वग्वन्तः, अयमेषामतिशयेन त्वग्वान् त्वचिष्ठः । उभाविमौ त्वग्वन्तौ, अयमनयोर[21]तिशयेन त्वग्वान् त्वचीयान् । अयमस्मात् त्वचीयान् ॥

## प्रशंसायां रूपप् । (६६/२०२१)

प्रशंसा स्तुतिः । प्रकृत्यर्थस्य विशेषणं चैतत् । प्रशंसाविशिष्टेऽर्थे वर्तमानात् प्रातिपदिकात् स्वार्थे रूपप् प्रत्ययो भवति[22] । स्वार्थिकाश्च प्रत्ययाः [23]प्रकृत्यर्थविशेषस्य द्योतका भवन्ति । प्रशस्तो वैयाकरणो वैयाकरणरूपः । याज्ञिकरूपः[24] ।

प्रकृत्यर्थस्य वैशिष्ट्ये प्रशंसा भवति । वृषलरूपोऽयं यः पलाण्डुना सुरां पिबति (म. भा. २.४११) । चोररूपः, [25]दस्युरूपः, योऽक्ष्णोरप्यञ्जनं हरेत् ।

---

1. शब्दयोः इत्यधिकम् ब. ह. 2. प्रत्यययोः इत्यधिकम् ग. फ. ह. 3. साधिष्ठं ह, अयमपि साधीयोऽधीते क, उभौ इमौ बाढमधीयाते, अयमनयोः साधीयोऽधीते क. 4. इत्यर्थः इत्यधिकम् ग. 5. इत्येतयोः फ. 6. प्रत्यययोः इत्यधिकम् क. फ. ग. 7. विज्ञेयम् ड. फ. 8. अतिशयेन नास्ति फ. 9. उभौ इमौ क. ड. फ. 10. अतिशयेन नास्ति फ. 11. अयमस्मात् कनीयान् नास्ति ब. क. ड. 12. इति वा नास्ति ब. ड. फ. ग. 13-14. अतिशयेन नास्ति फ. 15. मतोश्च क. ह. 16. लुग् इत्यधिकम् ड. 17. सर्वस्य क, भावस्य ड. 18. स्रग्विणः नास्ति क. 19-20-21. अतिशयेन नास्ति क. ह. 22. विशेषे इत्यधिकम् क. ड, वैशिष्ट्ये इत्यधिकम् ह. 23. प्रकृत्यर्थस्य विशेषणं द्योतयन्ति ड. 24. छान्दसरूपः इत्यधिकम् क. फ. 25. दस्युरूपम् फ.